This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं. पु. 11
123

आर्यशतकम् १८० सर्ग

Acc. No: M1154
Title:- आर्या शतकम्
Subject:- poetry
पत्रे : 33

KKSU LIBRARY
RAMTEK
441 106
M-1154
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥जयतिरघुवंशातिलकः कौसल्याहृदयनं
दनोरामः॥दशवदननिधनकारीराशरथिःपुंडरीकाक्षः॥
कूजंतंरामरामेतिमधुरंमधुराक्षरं॥आरुह्यकविताशाखां
वंदेवाल्मीकिकोकिलं॥१॥वाल्मीकेर्मुनिसिंहस्यकविताव न
चारिणः॥शृण्वन्रामकथानादंकोनयातिपरांगतिं॥२॥

(2)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः पिबन्सततं रामचरितामृतसागरं ॥ अतृप्तस्तं मुनिं वंदे भा
वेतसमकल्मषं ॥ ३ ॥ गोष्पदीकृतवारीशं मशकीकृतराक्षसं ॥ रामा
यणमहामालारत्नं वंदे निलात्मजं ॥ ४ ॥ अंजनानंदनं वीरं जानकी
शोकनाशनं ॥ कपीशमक्षहंतारं वंदे लंकाभयंकरं ॥ ५ ॥ उल्लंघ्य
सिंधोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ॥ आदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतेनैवदहाहंकांनमामितंप्रांजलिरांजनेयं॥६॥मनोजवंमा
रुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठं॥वातात्मजंवानरयूथ
मुख्यंश्रीरामदूतंशिरसानमामि॥७॥रामायरामभद्रायरा
मचंद्रायवेधसे॥रघुनाथायनाथायसीतायाःपतयेनमः॥
॥८॥जितंभगवतातेनहरिणालोकधारिणा॥अजेनविश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपेणनिर्गुणेनगुणात्मना ॥९॥ तपःस्वाध्यायनिरतंतप
स्वीवाग्विदांवरं ॥ नारदंपरिपप्रच्छवाल्मीकिर्मुनिपुंगवः
॥१०॥ कोन्वस्मिन्साम्प्रतंलोकेगुणवान्कश्चवीर्यवान् ॥ ध
र्मज्ञश्चकृतज्ञश्चसत्यवाक्योदृढव्रतः ॥१२॥ चारित्रेणचको
युक्तःसर्वभूतेषुकोहितः ॥ विद्वान्कःकःसमर्थश्चकश्चै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कप्रियदर्शनः ॥१२॥ आत्मवान्कोजितक्रोधो द्युतिमान्कोनसू
यकः ॥ कस्यबिभ्यतिदेवाश्चजातरोषस्यसंयुगे ॥१३॥ एतद्वि
च्छाम्यहंश्रोतुंपरंकौतूहलंहिमे ॥ महर्षेत्वंसमर्थोसिज्ञातु
मेवंविधंनरं ॥१४॥ श्रुत्वाचैतत्त्रिलोकज्ञोवाल्मीकेर्नारदोव
चः ॥ श्रूयतामितिचामंत्र्यप्रहृष्टोवाक्यमब्रवीत् ॥१५॥ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हवोडुलीभाश्चैवयेलयाकीर्तिता गुणाः॥मुनेवक्ष्याम्यहंबुधा
तैर्युःश्रूयतांनरः॥१६॥इक्ष्वाकुवंशाप्रभवोरामोनामजनैःश्रु
तः॥नियतात्मामहावीर्योद्युतिमान्धृतिमान्वशी॥१७॥बु
द्धिमान्नीतिमान्वाग्मीश्रीमान्छत्रुनिबर्हणः॥विपुलोसो
महाबाहुःकंबुग्रीवोमहाहनुः॥१८॥महोरस्कोमहेष्वासो

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूढजत्रुररिंदमः॥ आजानुबाहुःसुशिराःसुललाटःसुविक्रमः॥१९॥
समःसमविभक्तांगःस्निग्धवर्णःप्रतापवान्॥ पीनवक्षाविशालाक्षो
लक्ष्मीवान्छुभलक्षणः॥२०॥धर्मज्ञःसत्यसंधश्चप्रजानांचहितेर
तः यशस्वीज्ञानसंपन्नः शुचिर्वश्यःसमाधिमान्॥२१॥प्रजा
पतिसमःश्रीमान्धातारिपुनिषूदनः॥रक्षितात्रीवलोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्य परिरक्षिता ॥२१॥ रक्षिता स्वस्य धर्मस्य यजनस्य च रक्षि
ता ॥ रक्षितास्वस्य धर्मस्य स्वजनस्य च रक्षिता ॥ वेदवेदांगतत्त्वज्ञो
धनुर्वेदे च निष्ठितः ॥२३॥ सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रति
भानवान् ॥ सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥२४॥ स
र्वाभिगमैः सद्भिः समुद्र इव सिंधुभिः ॥ आर्यः सर्वसमश्चैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदैवप्रियदर्शनः ॥२५॥ स चसर्वगुणोपेतः कौसल्यानंदवर्धनः
समुद्रइवगांभीर्ये धैर्येणहिमवानिव ॥२६॥ विष्णुनासदृशोवीर्ये
सोमवत्प्रियदर्शनः ॥ कालाग्निसदृशः क्रोधेक्षमयापृथिवीसमः
॥२७॥ धनदेनसमस्त्यागेसत्येधर्मइवापरः ॥ तमेवंगुणसंपन्नंरा
मंसत्यपराक्रमं ॥२८॥ ज्येष्ठंश्रेष्ठगुणैर्युक्तंप्रियंदशरथसुतं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मङ्कतीनोहितेयुक्तंमङ्कानिप्रियकाम्यया॥२९॥योवराज्येनसं
योक्तुमैच्छल्लीलामहीपतिः॥तस्याभिषेकसंभारान्दृष्ट्वाना
र्थकैकयी॥३०॥पूर्वदत्तवरादेवीवरमेनमयाचत॥विवासनं
चरामस्यभरतस्याभिषेचनं॥३०॥ससत्यवचनाद्राजाधर्मपा
शेनसंयतः॥विवासयामाससुतंरामंदशरथः प्रियं॥३१॥

सजगमवनंवीरः प्रतिज्ञामनुपालयन् ॥ पितुर्वचननिर्देशात्कै
केय्याः प्रियकारणात् ॥३३॥ नंव्रजंतंप्रियंभ्रातालक्ष्मणोनुज
गामह ॥ स्नेहाद्विनयसंपन्नः सुमित्रानंदवर्द्धनः ॥३४॥ भ्रात
रंदयितोभ्रातुः सौभ्रात्रमनुदर्शयन् ॥ रामस्यदयिताभा
र्यानित्यंप्राणसमाहिता ॥३५॥ जनकस्यकुलेजातादेवमायेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मिता ॥ सर्वलक्षणसंपन्ना नारीणामुत्तमावधूः ॥ सीताप्यनु
गतारामंशशिनंरोहिणीयथा ॥ पौरैरनुगतोदूरंपितृवाहशार
थेनच ॥ ३७ ॥ शृंगवेरपुरेसूतंगंगाकूलेव्यसर्जयत् ॥ गुहमासा
द्यधर्मात्मानिषादाधिपतिंप्रियं ॥ ३८ ॥ गुहेनसहितोरामोल
क्ष्मणेनचसीतया ॥ तेवनेनवनंगत्वानदीस्तीर्त्वाबहूदकाः ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रकूटमनुप्राप्यभरद्वाजस्यशासनात्॥रम्यमावसथंकृत्वा
रममाणावनेत्रयः॥४०॥देवगंधर्वसंकाशास्तत्रतेन्यवसन्सुखं॥चित्रकूटंगतेरामे पुत्रशोकातुरस्तदा॥४१॥राजादशरथः
स्वर्गंजगामविलपन्सुतं॥मृतेतुतस्मिन्भरतोवशिष्ठप्रमुखैर्द्विजैः॥४२॥नियुज्यमानोराज्यायनैच्छद्राज्यंमहाबलः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सजग्राहवनंवीरोरामपादमसादृशः ॥४३॥ गत्वातुसुमहात्मानं
रामंसत्यपराक्रमं ॥ अयाचद्भ्रातरंराममार्यभावपुरस्कृतः ॥
४४॥ त्वमेवराजाधर्मज्ञइतिरामंवचोब्रवीत् ॥ रामोपिपरमोदारः
सुमुखः सुमहायशाः ॥४५॥ नचैछात्सितुराद्देशाद्राज्यंरामो
महाबलः ॥ पादुकेचास्यराज्यायन्यासंदत्वापुनः पुनः ॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवर्तयामास ततो भरतं भरताग्रजः ॥ सकाममनवाप्यैव रामपाद
वुपस्पृशन् ॥ ४७ ॥ नंदिग्रामेकरोद्राज्यं रामागमनकांक्षया ॥ ग ते
तु भरतेश्रीमान् सत्यसंधोजितेंद्रियः ॥ ४८ ॥ रामस्तु पुनरालं
क्ष्यनागरस्यजनस्यच ॥ तत्रागमनमेकाग्रो दंडकान्प्रविवेशह
॥ ४९ ॥ प्रविश्यतु महारण्यंरामोराजीवलोचनः ॥ विराधंराक्षसंह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाशारभंगंददर्शह ॥ ५० ॥ सुतीक्ष्णंचापगस्यंचभ्रगस्यभ्रातरं
तथा ॥ भ्रगस्यवचनाच्चैवजग्राहेंद्रंशरासनं ॥ ५१ ॥ खड्गंच पर
मप्रीतस्तूणीचाक्षयसायकौ ॥ वसतस्तस्यरामस्यवनेवनचरैः
सह ॥ ५२ ॥ ऋषयोभ्यागमन्सर्वेवधायासुररक्षसां ॥ सतेषामति
शुश्रावराक्षसानांतदावने ॥ ५३ ॥ प्रतिज्ञातश्चरामेणवधःसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिरक्षसां ऋषीणामग्निकल्पानांदंडकारण्यवासिनां ॥५४॥ते
ननचैवसताजनस्थाननिवासिनी विरूपिताश्शूर्पणखाराक्षसी
कामरूपिणी ॥५५॥ततःशूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान्
खरंत्रिशिरसंचैवदूषणंचैवराक्षसं ॥५६॥निजघानरणेरामस्ते
षांचैवपदानुगान्वनेतस्मिन्निवसताजनस्थाननिवासिनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५७॥ रक्षसां निहतान्यासन्सहस्राणि चतुर्दश। ततोज्ञातिवधं
श्रुत्वारावणः क्रोधमूर्छितः॥५८॥ सहायंवरयामास मारीचंना
मराक्षसं॥ गार्यमाणः सुबहुशो मारीचेनसरावणः॥५९॥ नवि
रोधोबलवतासमोरावणतेनते॥ अनादृत्यतु तद्वाक्यं रावणः
कालचोदितः॥६०॥ जगामसह मारीचस्तस्याश्रमपदंतदा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनमायाविनादूरमपवाह्यरुपात्मजौ॥६१॥जहार भार्यांराम
स्यगृध्रंहत्वाजटायुषंगृध्रंचनिहतंदृष्ट्वाहतांश्चस्वाच मै
थिलीं॥६२॥राघवःशोकसंतप्तोविललापाकुलेंद्रियः॥तत
स्तेनैवशोकेनगृध्रंदग्ध्वाजटायुषं॥६३॥मार्गमाणोवनेसीतां
राक्षसंसंददर्शह॥कबंधंनामरूपेणविकृतंघोरदर्शनं॥६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं निहत्य महाबाहुर्दाहस्वर्गतश्च सः ॥ सचास्य कथयामास
शबरीं धर्मचारिणीं ॥ ६५ ॥ श्रमणीं धर्मनिपुणामभिगच्छेति रा
घव ॥ सोभ्यगच्छन्महातेजाः शबरीमाश्रमं प्रति ॥ ६६ ॥ शबर्या
पूजितः सम्यक्रामोदशरथात्मजः ॥ पंपातीरेहनुमतासंगतो
वानरेणह ॥ ६७ ॥ हनूमद्वचनाच्चैव सुग्रीवेणसमागतः ॥ सुग्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायचत्सर्वंशंसद्रामोमहाबलः॥६८॥भाहितस्तद्यथारत्नंसीताय
श्चविशेषतः सुग्रीवश्चापितत्सर्वंश्रुत्वारामस्यवानरः॥६९॥चकार
सख्यंरामेणप्रीतश्चैवाग्निसाक्षिकं॥ततोवानरराजेनवैरानुकथनं
प्रति॥७१॥वालिनश्चबलंतत्रकथयामासवानरः॥सुग्रीवःशंकित
श्चासीन्नित्यंवीर्येणराघवे॥७२॥राघवःप्रत्ययार्थंतुदुंदुभेःकायमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमं दर्शयामाससुग्रीवो महापर्वतसंनिभं ॥७३॥ उत्स्मयित्वामहाबा
हुः प्रेक्ष्यचास्थिमहाबलः पादांगुष्ठेनचिक्षेपसंपूर्णदशयोजनं
॥७४॥ बिभेदचपुनस्तालान्सप्तैकेनमहेषुणा गिरिंरसातलंचैव
जनयन्प्रत्ययंतदा ॥७५॥ ततःप्रीतमनास्तेनविश्वस्तःसमहाकपिः
किष्किंधांरामसहितोजगामचगुहांतदा ॥७६॥ ततोगर्जद्धरिवरःसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीवोहेमपिंगलः॥ तेननादेन महता निर्जगामकपीश्वरः॥७७॥ मनु
मान्यतदातारंसुग्रीवेणसमागतः॥ निजघानचतत्रैनंशरेणैकेन
राघवः॥७८॥ ततःसुग्रीववचनाद्वालिनंमाहवे॥ सुग्रीवमेव
तद्राज्येराघवःप्रत्यपादयेत्॥७९॥ सचसर्वान्समानीयवानरान्
वानरर्षभः॥ दिशःप्रस्थापयामासदिदृक्षुर्जनकात्मजां॥८०॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोग्रध्वस्यवचनात्संपातेर्हनुमान्बली ॥ शतयोजनविस्तीर्णंपुप्लु
वेलवणार्णवं ॥ ८१ ॥ तत्रलंकांसमासाद्यपुरींरावणपालितां ॥ इद
ऋसीतांध्यायंतीमशोकवनिकागतां ॥ ८२ ॥ निवेदयित्वाभिज्ञानं
प्रवृत्तिंचनिवेद्यच ॥ समाश्वास्यचवैदेहींदर्शयामासतोरणं ॥ ८
३ ॥ पंचसेनाग्रगान्हत्वासप्तमंत्रिसुतानपि ॥ शूरमक्षंचनिष्

पिष्यग्रहणंसमुपागमत् ८४ अस्त्रेणोन्मुक्तमात्मानंज्ञात्वापैता
महाद्रान् मर्षयन्राक्षसान्घोरान्मंत्रिणस्तान्यदृछया
८५ ततोदग्ध्वापुरींलंकामनेसीतांचमैथिलीं रामायप्रिय
माख्यातुंपुनरायान्महाकपिः ८६ सोभिगम्यमहात्मानंस
त्रारामंप्रदक्षिणं न्यवेदयदमेयात्मादृष्टासीतेतितत्त्वतः ८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः सग्रीवसहितो गत्वा तीरं महोदधेः ॥ समुद्रक्षोभयामास
शरैरादित्यसंनिभैः ॥८८॥ दर्शयामास चात्मानं समुद्रः सरितां
पतिः ॥ समुद्रवचनाच्चैव नलः सेतुमकारयेत् ॥८९॥ तेन गत्वा पु
रीं लंकां हत्वा रावणमाहवे ॥ रामः सीतामनुप्राप्य परां व्रीडामुपा
गमत् ॥९०॥ तामुवाचततो रामः पारुष्यं जनसंसदि ॥ अमृष्यमाणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सासीताविवेशज्वलनंसती ॥९३॥ततोग्निवचनात्सीतांज्ञात्वाविग
तकल्मषो ॥कर्मणातेनमहतात्रैलोक्यंसचराचरं ॥सदेवर्षिगणंतु
ष्टंराघवस्यमहात्मनः ॥बभौरामःसमहृष्टःपूजितःसर्वदैवतैः
॥९४॥अभिषिच्यचलंकायांराक्षसेंद्रंविभीषणं ॥कृतकृत्यस्तदारा
मोक्ष्वरःप्रमुमोदह ॥९५॥देवताभ्योवरंप्राप्यसमुत्थाप्यचवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरान्॥भयो ध्यानस्थितोरामः पुष्पकेणसुहृद्वृतः॥९५॥भरद्वा
जाश्रमंगत्वारामः सत्यपराक्रमः॥ भरतस्यांतिकंरामोहनुमंतं
व्यसर्जयत्॥९६॥पुनराख्यायिकांजल्पन्सुग्रीवसहितस्तदा॥पु
ष्पकंतत्समारुह्यनंदिग्रामंययौतदा॥९७॥नंदिग्रामेजटांहित्वा
भ्रातृभिःसहितोनघः॥रामःसीतामनुप्येम्राज्यंपुनरवाप्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वान्॥९८॥मत्स्थमुदितोलोकस्तुष्टः पुष्टः सुधार्मिकः॥निरामयोह्य
रोगश्चदुर्भिक्षभयवर्जितः॥९९॥नपुत्रमरणंकेचिद्द्रक्ष्यंतिपुरुषाःक्व
चित्॥नार्यश्चाविधवानित्यंभविष्यंतिपतिव्रताः॥१००॥नाचाग्निजं
भयंकिंचित्नाप्सुमज्जंतिजंतवः॥नवातजंभयंकिंचिन्नापिज्वरकृतं
तथा॥१॥नवापिक्षुद्भयंतत्रनतस्करभयंतथा॥नगराणिचराष्ट्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णिधनधान्ययुतानिच ॥ २ ॥ निर्मनुष्टिताः सर्वेयथाकृतयुगेत
था ॥ अश्वमेधशतैरिष्ट्वातथाबहुसुवर्णकैः ॥ ३ ॥ गवांकोट्ययु
तंदत्वाब्रह्मलोकंगमिष्यति ॥ असंख्येयंधनंदत्वाब्राह्मणेभ्योम
हायशाः ॥ राजवंशान्छतगुणान्स्थापयिष्यतिराघवः ॥ चातुर्व
र्ण्यंचलोकेस्मिन्स्वेस्वेधर्मेनियोक्ष्यति ॥ ५ ॥ दशवर्षसहस्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशवर्षशतानिच ॥ रामोरा ज्यमुपासीत्ब्रह्मलोकंप्रयास्यति
॥६॥ इदंपवित्रंपापघ्नंपुण्यंवेदैश्चसंमितं ॥ यः पठेद्रामचरितं
सर्वपापैःप्रमुच्यते ॥७॥ एतदाख्यानमायुष्यंपठन्रामायणं
नरः ॥ सपुत्रपौत्रःसगणःप्रेत्यस्वर्गेमहीयते ॥८॥ पठन्द्विजो
वाग्ऋषभत्वमीयात्स्याक्षत्रियोभूमिपतित्वमीयात् ॥ वणिक्जनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुण्यशिवतमीयाजनश्चश्रद्दोपिमहत्तमीयात्॥९॥इत्यार्षेरा
मायणेआदिकाव्येवाल्मीकीयनारदवाक्येसंक्षेपोनामप्रथमः
सर्गः॥१॥समाप्तिमगमत्॥श्रीसीतारामाभ्यांनमः॥शुभंभव
तु ✣ ✣ ✣ ✣ ✣ ✣

KKSU LIBRARY
RAMTEK
441 106
M-1254
Dist Nagpur

53

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 16:05
,TRANSFERRED=2020/10/20 at 16:10:26
,PAGES=33
,TYPE=STD
,NAME=S0004248
,Book Name=M-1154-AARSH RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection